শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ একোনপঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ একোনপঞ্চাশঃ সর্গঃ ॥

## গ্রাম্যাণাং ৱার্তাং শৃণ্ৱতঃ শ্রীরামস্য কোসলসীমানমতিক্রম্য গমনং ৱেদশ্রুতিগোমতীস্যন্দিকাখ্যাঃ সরিতঃ সমুত্তীর্য্য তস্য সুমন্ত্রং প্রতি কিঞ্চিন্নিৱেদনম্

রামোঽপি রাত্রিশেষেণ তেনৈৱ মহদন্তরম্।
জগাম পুরুষৱ্যাঘ্রঃ পিতুরাজ্ঞামনুস্মরন্॥ **2.49.1** ॥

তথৈৱ গচ্ছতস্তস্য ৱ্যপাযাদ্ রজনী শিৱা।
উপাস্য তু শিৱাং সন্ধ্যাং ৱিষযানত্যগাহত॥ **2.49.2** ॥

গ্রামান্ ৱিকৃষ্টসীমান্তান্ পুষ্পিতানি ৱনানি চ।
পশ্যন্নতিযযৌ শীঘ্রং শনৈরিৱ হযোত্তমৈঃ॥ **2.49.3** ॥

শৃণ্ৱন্ ৱাচো মনুষ্যাণাং গ্রামসংৱাসৱাসিনাম্।
রাজানং ধিগ্ দশরথং কামস্য ৱশমাস্থিতম্॥ **2.49.4** ॥

হা নৃশংসাদ্য কৈকেযী পাপা পাপানুবন্ধিনী।
তীক্ষ্ণা সম্ভিন্নমর্যাদা তীক্ষ্ণকর্মণি ৱর্ততে॥ **2.49.5** ॥

যা পুত্রমীদৃশং রাজ্ঞঃ প্রৱাসযতি ধার্মিকম্।
ৱনৱাসে মহাপ্রাজ্ঞং সানুক্রোশং জিতেন্দ্রিযম্॥ **2.49.6** ॥

কথং নাম মহাভাগা সীতা জনকনন্দিনী।
সদা সুখেষ্ৱভিরতা দুঃখান্যনুভৱিষ্যতি॥ **2.49.7** ॥

অহো দশরথো রাজা নিঃস্নেহঃ স্বসুতং প্রতি।
প্রজানামনঘং রামং পরিত্যক্তুমিহেচ্ছতি॥ **2.49.8** ॥

এতা ৱাচো মনুষ্যাণাং গ্রামসংৱাসৱাসিনাম্।
শৃণ্ৱন্নতিযযৌ ৱীরঃ কোসলান্ কোসলেশ্ৱরঃ॥ **2.49.9** ॥

ততো ৱেদশ্রুতিং নাম শিৱৱারিৱহাং নদীম্।
উত্তীর্যাভিমুখঃ প্রাযাদগস্ত্যাধ্যুষিতাং দিশম্॥ **2.49.10** ॥

গৎৱা তু সুচিরং কালং ততঃ শীতৱহাং নদীম্।
গোমতীং গোযুতানূপামতরৎ সাগরঙ্গমাম্॥ **2.49.11** ॥

গোমতীং চাপ্যতিক্রম্য রাঘৱঃ শীঘ্রগৈর্হযৈঃ।
মযূরহংসাভিরুতাং ততার স্যন্দিকাং নদীম্॥ **2.49.12** ॥

স মহীং মনুনা রাজ্ঞা দত্তামিক্ষ্ৱাকৱে পুরা।
স্ফীতাং রাষ্ট্রৱৃতাং রামো ৱৈদেহীমন্ৱদর্শযৎ॥ **2.49.13** ॥

সূত ইত্যেৱ চাভাষ্য সারথিং তমভীক্ষ্ণশঃ।
হংসমত্তস্বরঃ শ্রীমানুৱাচ পুরুষোত্তমঃ॥ **2.49.14** ॥

কদাহং পুনরাগম্য সরয্ৱাঃ পুষ্পিতে ৱনে।
মৃগযাং পর্যটিষ্যামি মাত্রা পিত্রা চ সঙ্গতঃ॥ **2.49.15** ॥

নাত্যর্থমভিকাঙ্ক্ষামি মৃগযাং সরযূৱনে।
রতির্হ্যেষাতুলা লোকে রাজর্ষিগণসম্মতা॥ **2.49.16** ॥

রাজর্ষীণাং হি লোকেঽস্মিন্
রত্যর্থং মৃগযা ৱনে।
কালে কৃতাং তাং মনুজৈ -
র্ধন্ৱিনামভিকাঙ্ক্ষিতাম্॥ **2.49.17** ॥

স তমধ্ব্রানমৈক্ষ্ব্রাকঃ সূতং মধুরযা গিরা।
তং তমর্থমভিপ্রেত্য যযৌ ব্রাক্যমুদীরযন্॥ **2.49.18**॥

॥ইত্যার্ষে শ্রীমদ্রামাযণে ব্রাল্মীকীযে আদিকাব্র্যে
অযোধ্যাকাণ্ডে একোনপঞ্চাশঃ সর্গঃ॥